दैनिकम् ई-संस्कृतवार्तापत्रम्

हिमसंस्कृतवार्ता

पञ्चाङ्गम्
वि.सं. २०८३,
कलियुगाब्धः ५१२७ हेमन्त-ऋतुः
सूर्यः दक्षिणायनम् कार्तिकशुक्लनवमी
मार्गशीर्ष ०३ प्रविष्टांशः मङ्गलमयः भवेत्

■ पृष्ठ-9 ■ वर्ष-6 ■ अङ्क-22 | 1 | नवम्बर 18, 2026 | Website- www.himsanskritam.com | Email-himsanskrit@gmail.com

2 नारीशक्तिवन्दन-अधिनियमान्तर्गतं महिलाभ्यः ३३ प्रतिशतम् आरक्षणं प्रदातुं देशः अग्रे सरिष्यति : लोकसभाध्यक्षः ओमबिरला

4 विधानसभायां भ्रष्टाचारविषये सङ्ग्रामः, मुख्यमन्त्री सुक्खूः अवदत्—हिमाचलस्य सम्पदां लुण्ठयितॄन् कारागारं प्रेषयिष्यामः

7 सिद्धार्थनगरे शताधिकानां युगलानां सामूहिकविवाहः सम्पन्नः संस्कृतविद्यालयानां ३९ शिक्षकाः, विद्वांसः, विद्यार्थिनश्च सहयोगे निरताः

प्रधानमन्त्री नरेन्द्रमोदी फिलीपीन्स-देशस्य मनीला नगरे त्रयोविंशतितमम् आसियान्-भारत-शिखर सम्मेलनं

सम्बोधयन् हिन्द-प्रशान्त क्षेत्रे शान्तिं, स्थिरतां, समृद्धिं च सुनिश्चेतुं भारत-आसियान्-सहयोग-समेधनाय आह्वानम् अकरोत्



प्रधानमन्त्री नरेन्द्रमोदी फिलीपीन्स-देशस्य मनीला-नगरे त्रयोविंशतितमम् आसियान्-भारत-शिखर सम्मेलनं सम्बोधयन् हिन्द-प्रशान्तक्षेत्रे शान्तिं, स्थिरतां, समृद्धिं च सुनिश्चेतुं भारत-आसियान्-सहयोग-समेधनाय आह्वानम् अकरोत्। सः अवोचत् यत् भारतस्य एक्ट्-ईस्ट् इत्यनया नीत्या अस्यै सहभागितायै नूतना गतिः प्रदत्ता अथ आङ्ङ्कीय प्रौद्योगिक्यां रक्षाक्षेत्रे, अन्तरिक्षेत्रे च सहयोगस्य विस्तारः कृतः । सुदृढान् जन-स्तरीय-सम्बन्धान् प्रतिपादयन् सः सूचितवान् यत् चतुर्दशाधिक-द्विसहस्रतमात् वर्षादारभ्य सार्ध-द्विशतादधिकाः त्वरित-प्रभाव-परियोजनाः अथ च दशसहस्रादधिकाः छात्रवृत्तयः प्रदत्ताः सन्ति। तदनन्तरम् एकविंशतितमं पूर्व-एशिया-शिखर सम्मेलनं सम्बोधयन् श्रीमोदी एकं शान्तिपूर्ण समृद्धं च हिन्द-प्रशान्त क्षेत्रं प्रति भारतस्य प्रतिबद्धतां पुनः दृढीकृतवान् सहैव आसियान्-सङ्गठनस्य केन्द्रीयतायां विशेष बलं दत्तवान्। सः मनीला-स्थितस्य खालसा दीवान-गुरुद्वारा इत्यस्य अपि दर्शनम् अकरोत् अथ च तस्य पुनर्विकास-कार्याणां शिलान्यास-समारोहे सहभागिताम् अपि अकरोत्।

आसियान्-सदस्य-देशाः भारतं च पूर्व-सञ्चेतना-प्रणालीषु, आपात्कालीन-प्रतिक्रियायाम्, आपत्सज्जतायाम् अथ च उत्थानशील-पुनर्निर्माणे विशेषावधानं दत्त्वा आपत्प्रबन्धन क्षेत्रे स्वकीय-सहयोगं सुदृढीकर्तुं सम्मतिं प्राकटयन्।

आसियान्-सदस्य-देशाः भारतं च पूर्व-सञ्चेतना-प्रणालीषु, आपात्कालीन-प्रतिक्रियायाम्, आपत्सज्जतायाम् अथ च उत्थानशील-पुनर्निर्माणे विशेषावधानं दत्त्वा आपत्प्रबन्धन-क्षेत्रे स्वकीय-सहयोगं सुदृढीकर्तुं सम्मतिं प्राकटयन्। इयं सम्मतिः फिलीपीन्स देशस्य मनीला-नगरे आयोज्यमाने त्रयोविंशतितमे आसियान-भारत-शिखर सम्मेलने अभवत्, यत्र उभौ पक्षौ आपत् प्रबन्धने सहयोग-विषयकम् आसियान्-भारत-संयुक्त-वक्तव्यम् अङ्गीकृतवन्तौ। अनेन क्षेत्रीय समन्वयस्य संवर्धनम् अथ च प्राकृतिक आपदां प्रतिकाराय प्रतिरोधि क्षमतायाः विकासः लक्षितः।

सुभाषितम्

सामर्थ्यमूलं स्वाग्रन्त्यं श्रममूलं च वैभवम्।
न्यायमूलं स्वराज्यं स्यात् संघमूलं महाबलम्।।

भावार्थः- स्वतन्त्रता की प्राप्ति (और उसकी रक्षा) केवल शक्ति और सामर्थ्य होने से ही होती है और वैभव (धन संपत्ति और सर्वत्र खुशहाली) भी श्रम करने से ही मिलती है। स्वराज्य का मूल कारण अच्छी न्यायव्यस्था का होना तथा किसी देश के अत्यन्त शक्तिशाली होने का मूल कारण उसके लोगों में एकता और संगठन की भावना का होना है।

हिमसंस्कृतवार्तापत्रस्य एकवर्षस्य सदस्यता १००₹
One year subscription to the daily Sanskrit newspaper is Only 100 Rupees
To subscribe, text us a message saying hello on the number below.
7876636263
कार्यालयः, हिमसंस्कृतम्, प्रकाशनम्
जसवां कोटला तहसीलपरिसरस्य सम्मुखे
कस्बा कोटला जिला कांगड़ा हि.प्र.
पत्रव्यवहारसङ्केतः-१७७१११
कार्यालीयः सम्पर्कः- शिवानी शर्मा 7876636263
सूचना- हिमसंस्कृतवार्ताः दैनिकपत्रे व्याकरणात्मक-अशुध्दीनां कृते, राजनैतिक-सांस्कृतिकविचाराणाञ्च कृते सम्बद्धाः पत्राकाराः लेखकाश्च उत्तरदायिनः भविष्यन्ति

संपादकगणः- डॉ.अमनदीपशर्मा, डॉ.मनोज शैलः, डॉ.अमित शर्मा, डॉ.नरेन्द्रराणा,
प्रचारगणः- जगदीश डाभी गुजरातम्, वृजेश कुमार पाण्डेयः, उ.प्र, सत्येन्द्रपाठकः उ.प्र, डा.विमलेश झा बिहारम्, डा.राघवनाथ झा बिहारम्, डॉ.पद्मनाभः हिमाचलम्, डा.निशिकान्त पाण्डेयः प.बंगाल, नवीन ममगाईं उत्तराखण्ड, कुलदीप मैन्दोला उत्तराखण्ड, डा.नवीनशर्मा हरियाणा, अजय कुमार आर्य पंजाब, ईशान तिवारी दिल्ली, रवि खरडिहालः कर्नाटक, डॉ.वर्षा टोणगांवकरः, सुधा साढले महाराष्ट्रम्, ईदर धीरजः आन्ध्रप्रदेशः, नारद उपाध्यायः, डा.नयन ज्योति शर्मा असम

'लीडरशिप-एस-मिशन' इति विषयमधिकृत्य कार्यशालायाः शुभारम्भः



नीत्यायोगेन नवदेहल्यां भारतमण्डपम् इत्यत्र 'लीडरशिप-एस-मिशन' इति विषयमधिकृत्य कार्यशालायाः शुभारम्भः कृतः। एषा पञ्चराष्ट्रियकार्यशालानां शृङ्खलायाः प्रथमा कार्यशाला अस्ति। एतासां कार्यशालानाम् आयोजनम् आगामिषु दिवसेषु भविष्यति। अन्यासु चतसृषु कार्यशालासु शासनस्य माध्यमेन सेवाप्रदानम्, समावेशितायाः माध्यमेन विकासः, रिक्थसम्बद्धपरिचयः तथा भारतस्य वैश्विकभूमिका इत्येते विषयाः चर्चिताः भविष्यन्ति। एषा कार्यशालाशृङ्खला आगामिवर्षस्य अक्टूबरमास-पर्यन्तं प्रचलिष्यति।

विगतेषु दश-वर्षेषु देशे मलेरियारोग-प्रकरणेषु तज्जनित-मृत्युषु च प्रायः अशीति-प्रतिशतं न्यूनता आगता - राष्ट्रपतिः



राष्ट्रपतिपदासीना द्रौपदी-मुर्मुः अवोचत् यत् भारतेन विगतेषु वर्षेषु मलेरिया-रोगस्य नियन्त्रणे महत्त्वपूर्णा प्रगतिः कृता। राष्ट्रपतिः नव-देहल्यां भारतीय आयुर्विज्ञान-अनुसन्धान-परिषदः राष्ट्रिय-मलेरिया-अनुसन्धान-संस्थानस्य स्वर्णजयन्ती-समारोहं सम्बोधयन्ती इदं वक्तव्यं दत्तवती। सा प्रतिपादितवती यत् उत्तम-स्वास्थ्य-सेवाः, उन्नत औषधानि, मशक-नियन्त्रण-अभियानानि अथ सामुदायिक-सहभागिता च मलेरिया-प्रकरणानां नियन्त्रणे प्रभावशालिनीं भूमिकां निर्वहन्ति। राष्ट्रपतिः सूचितवती यत् विगतेषु दश-वर्षेषु देशे मलेरिया-रोग-प्रकरणेषु तज्जनित-मृत्युषु च प्रायः अशीति-प्रतिशतं न्यूनता आगता, सहैव उच्च-प्रभावित-जनपदानां सङ्ख्या पञ्चपञ्चाशदधिक-शतात् न्यूनीभूय त्रयस्त्रिंशत् अवशिष्टा अस्ति।

उत्तराखण्डे मार्गदुर्घटनायां द्वादशजनानां मृत्युः अभवत् तथा च एकत्रिंशत् जनाः आहताः



उत्तराखण्डे विगत-द्वादशहोरासु द्वयोः पृथक् पृथक् मार्गदुर्घटनयोः द्वादशजनानां मृत्युः अभवत् तथा च एकत्रिंशत् जनाः आहताः। अद्य प्रातः टिहरीजनपदस्य गुलर्-स्थानस्य समीपे यात्रिणाम् एकं बसयानं गभीरे गर्ते पतितम्। अस्यां दुर्घटनायाम् अष्टजनानां मृत्युः अभवत् तथा च पञ्चविंशतिः जनाः आहताः। अन्यस्यां दुर्घटनायामपि ह्यः रात्रौ रुद्रप्रयागजनपदे एकं वाहनं गभीरे गर्ते पतितम् । अनेन चतुर्णां जनानां मृत्युः अभवत् तथा च षट् जनाः व्रणिताः। राष्ट्रपतिः द्रौपदीमुर्मुः, उपराष्ट्रपतिः सी. पी. राधाकृष्णन् तथा प्रधानमन्त्री नरेन्द्रमोदी च एतासु दुर्घटनासु जातायां प्राणहानौ शोकं प्रकटितवन्तः। ते व्रणितानां शीघ्रस्वास्थ्यलाभाय शुभकामनाः अपि प्रकटितवन्तः।

दक्षिणरेलविभागेन काशीतमिलसङ्गमम् इत्यस्य कृते पञ्चविशिष्टरेलयानानां सूचना प्रख्यापिता



दक्षिणरेलविभागेन काशीतमिलसङ्गमम् इत्यस्य कृते पञ्चविशिष्टरेलयानानां सूचना प्रख्यापिता। एतानि पञ्च विशेषरेलयानानि विभिन्नेषु दिनाङ्केषु कन्याकुमारीतः, चेन्नई-नगरात् तथा कोयम्बतूर-नगरात् प्रस्थास्यन्ति। काशीतमिलसङ्गमम् इत्यस्य वार्षिकोत्सवः नवम्बरमासस्य अष्टाविंशतिदिनाङ्काद् आरभ्य दिसम्बरमासस्य द्वादशदिनाङ्कं यावत् प्रचलिष्यति । एषः कार्यक्रमः काशी-तमिलनाडु इत्येतयोः मध्ये च प्राचीनसम्बन्धस्य प्रतीकः अस्ति। तमिलनाडुतः प्रायः चतुर्दशशतं प्रतिभागिनः अस्मिन् सांस्कृतिककार्यक्रमे भागं ग्रहीष्यन्ति ।



नूतनमण्डलानां निर्माणविषये आयोगस्य प्रतिवेदनानन्तरमेव निर्णयः भविष्यति : मुख्यमन्त्री सुक्खू



विशेषप्रतिनिधिः — धर्मशाला। राज्ये नूतनमण्डलानां (जिलानां) गठनं प्रति मुख्यमन्त्री सुखविन्दरसिंहसुक्खू अवदत् यत् सर्वकारेण अस्मिन् विषये एकस्य आयोगस्य गठनं कृतम् अस्ति। मण्डलानि, उपमण्डलाधिकारिणः (एस.डी.एम.), विकासखण्डाः च इत्येतेषां निर्माणसदृशाः निर्णयाः सम्यक् विचार्य एव गृह्यन्ते। आयोगस्य प्रतिवेदनागमनानन्तरं मन्त्रिमण्डलम् उचितं निर्णयं ग्रहीष्यति। विधानसभायाः कार्यवाहीं समाप्य मुख्यमन्त्री उक्तवान् यत् सः देहलीप्रवाससमये श्रीमत्याः सोनियागान्धिवर्यायाः पुस्तकविमोचनकार्यक्रमे भागम् अगृह्णात्। तस्मिन् कार्यक्रमे काङ्ग्रेसशासितराज्यानां मुख्यमन्त्रिणः सहभागिदलानां नेतारश्च उपस्थिताः आसन्। सोनियागान्धिवर्यायाः राजनैतिकस्य व्यक्तिगतस्य च जीवनस्य उल्लेखं कुर्वन् सः अवदत् यत् तया भारतीयसंस्कृतेः परम्पराणां च अङ्गीकारं कृत्वा देशस्य एकतायै अखण्डतायै च महत्त्वपूर्णा भूमिका निर्व्यूढा। मुख्यमन्त्री अवदत् यत् राज्यस्य सम्पदां रक्षितुं तस्याः लाभं च जनसामान्यपर्यन्तं प्रापयितुं सर्वकारः निरन्तरं कार्यं कुर्वन् अस्ति।

वाइल्डफ्लावर हॉल' इति प्रकरणे मुख्यमन्त्री दावं कृतवान् यत् दीर्घकालात् प्रदेशाय शुल्कम् अदत्तवतीं सम्पत्तिं सर्वकारेण स्वाधीने कृतम् अस्ति तथा च प्रायः ४०१ कोटिरूप्यकाणि राज्यकोषे आनीतानि सन्ति। सर्वकारीयसम्पत्तीनां निजीहस्तेषु समर्पणस्य विपक्षस्य आरोपाणां प्रत्युत्तरे सः अवदत् यत् भाजपा विधानसभायां प्रलेखैः तथ्यैश्च सह स्वपक्षं स्थापयेत्। भाजपादलस्य आन्तरिकगुटबन्दीं प्रति लक्ष्यं कुर्वन् सः अवदत् यत् विपक्षः अनेकवर्गेषु विभक्तः अस्ति तथा च २०२७ तमे वर्षे जनता एव निर्णयं करिष्यति यत् कस्य दावेदारी भविष्यति।

बी.बी.एम.बी.-किशाऊ-विषये श्रेयग्रहणस्य स्थाने स्वकार्याणि गणयतु भाजपा

बी.बी.एम.बी. तथा किशाऊ-जलबन्धस्य विषये भारतीयजनतापक्षम् आक्रम्य मुख्यमन्त्री सुक्खू अवदत् यत् विपक्षः श्रेयग्रहणस्य स्थाने स्वकार्यकाले कृतानां कार्याणां विवरणं दद्यात्। तेन कथितं यत् तस्य सर्वकारेण किशाऊ-जलबन्धविषये हिमाचलप्रदेशस्य हितेभ्यः प्राथमिकता दत्ता अस्ति तथा च प्रदेशस्य हितैः सह कदापि समझौता न कृतः। '

प्रशासनिकव्ययं विना कथं निर्मीयन्ते नूतनमण्डलानि : जयरामठाकुरः

धर्मशाला। विपक्षनेता जयरामठाकुरः विधानसभासत्रात् बहिः पत्रकारैः सह संवादं कुर्वन् अवदत् यत् तस्य सर्वकारेण उद्घाटितानि उपमण्डलाधिकारि-कार्यालयाणि तहसील-कार्यालयाणि च पिहितानि (बन्द) कृतानि, अधुना तु सर्वकारस्य मण्डलनिर्माणस्य स्मरणम् आगच्छति, परन्तु एतदर्थं प्रशासनिकव्ययः कुतः प्रबन्धयिष्यते? विपक्षनेता आरोपितवान् यत् मुख्यमन्त्री सुखविन्दरसिंहसुक्खू स्वदलस्य नेतृनेव विश्वासं न नीतवान्, येन तेषां मध्ये एव अस्मिन् विषये विधायकदलस्य उपवेशने विवादः अपि अभवत्

नारीशक्तिवन्दन-अधिनियमान्तर्गतं महिलाभ्यः ३३ प्रतिशतम् आरक्षणं प्रदातुं देशः अग्रे सरिष्यति : लोकसभाध्यक्षः ओमबिरला

बेंगलुरु। लोकसभाध्यक्षः श्रीमान् ओमबिरला अवदत् यत् देशः 'नारीशक्तिवन्दन-अधिनियमः, २०२३' इत्यस्य अन्तर्गतं लोकसभायां राज्यविधानसभासु च महिलाभ्यः ३३ प्रतिशतम् आरक्षणं दातुं दिशि अग्रे गमिष्यति। अद्य बेंगलुरुनगरस्य 'विधानसौध'-भवने प्रथमायाः राष्ट्रमण्डल-महिलासांसद-भारतक्षेत्रीय-उपवेशनस्य उद्घाटनं कुर्वन् श्रीबिरला अवदत् यत् ग्रामपञ्चायततः आरभ्य संसद्पर्यन्तं महिलानां नेतृत्वं सुनिश्चितं करणीयम्। तेन उक्तं यत् महिलानां भूमिका केवलं सहभागितापर्यन्तमेव सीमिता न भवेत्, अपितु नेतृत्वे, नीतिनिर्माणे, विधिप्रणयने च तासां प्रभावशालिनी भूमिका भवेत्।श्रीबिरला अवदत् यत् अनेकराज्येभ्यः ग्रामपञ्चायतेषु नगरीयनिकायेषु च महिलाभ्यः पूर्वमेव ३३ तः ५० प्रतिशतं यावत् आरक्षणं प्रदत्तम् अस्ति। सः आशां प्रकटितवान् यत् संसदि राज्यविधानसभासु च अस्य क्रियान्वयनेन लोकतन्त्रं प्रत्येकं स्तरे सुदृढं भविष्यति। तेन कथितं यत् नीतिनिर्माणे महिलानाम् अधिकया सहभागितया लोकतन्त्रम् अधिकं संवेदनशीलं, समावेशि, उत्तरदायि च भविष्यति। लोकसभाध्यक्षेण लोकतान्त्रिक-संस्थासु पारदर्शितां कार्यक्षमतां च वर्धयितुं कृत्रिमबुद्धिमत्तायाः (आर्टिफिशियल इंटेलिजेंस) प्रौद्योगिक्याः च भूमिकायाम् अपि बलं दत्तम्। श्रीबिरला सूचितवान् यत् संसद्प्रशासने अधिकारिरूपेण महिलानां सहभागिता वर्धित्वा प्रायः ३४ तः ४२ प्रतिशतं यावत् अभवत्। द्विदिवसीये अस्मिन् सम्मेलने महिलासांसद्भ्यः स्वानुभवान् उत्तमकार्यप्रणालीश्च परस्परं विनिमयितुम् अवसरः मिलिष्यति। अस्मिन् अवसरे कर्णाटकस्य मुख्यमन्त्री अन्ये च गणमान्यजनाः उपस्थिताः आसन्।

विधायकस्य सुन्दरठाकुरस्य वक्तव्यम् : अवदत्—किं कुल्लू-निवासिनः केवलं वाद्ययन्त्रं वादयितुं स्थापिताः सन्ति?



हिमसंस्कृतवार्ता — धर्मशाला।

हिमाचलप्रदेशस्य कुल्लू-सदर-क्षेत्रस्य विधायकः सुन्दरसिंहठाकुरः अवदत् यत् किं कुल्लू-निवासिनः केवलं वाद्ययन्त्रं (बाजा) वादयितुं स्थापिताः सन्ति? कुल्लू-मण्डले चत्वारि लक्षं (४ लक्ष) जनाः निवसन्ति, किं कुल्लू काङ्गड़ा-मण्डलस्य हिमाचलप्रदेशस्य च भागः नास्ति? कुल्लू-क्षेत्रस्य विकासः जनतायाः मानसम्मानं च एव तस्य मुख्यं ध्येयम् अस्ति। तस्य मन्त्रिपदं प्रति कापि व्यक्तिगत-महत्त्वाकाङ्क्षा नास्ति। तेन मन्त्रिपदं प्राप्तुं किमपि आवेदनं न कृतम् अस्ति। माध्यमप्रतिनिधीनां (मीडिया) प्रश्नानाम् उत्तरं ददता तेन कथितं यत् तस्य प्राथमिकता कुल्लू-क्षेत्रस्य विकासः दलस्य कार्यकर्तॄणां मानसम्मानं च अस्ति। वीरभद्रसर्वकारस्य समये द्वौ मन्त्रिणौ ठाकुर-सत्यप्रकाशठाकुरः राजकृष्णगौड़श्च आस्ताम्, तथा च विधानसभा-उपाध्यक्षपदे (डिप्टी स्पीकर) ईश्वरदासः आसीत्।सः प्रावोचत् यत् कार्यकर्तृभ्यः स्वकीयां वार्तां स्थापयितुं पूर्णः अधिकारः वर्तते तथा तेषाम् असन्तोषः (नाराजगी) उपेक्षितः न करणीयः। ठाकुर-महोदयः अवदत् यत् कुल्लू प्रदेशस्य अग्रणी मण्डलम् अस्ति तथा च राजनैतिकपरिवर्तनेषु अत्रत्यजनानां सदैव महत्त्वपूर्णा भूमिका जाता अस्ति। काङ्ग्रेस-दलं सुदृढं निर्मातुं कुल्लू-मण्डलस्य कार्यकर्तृभिः दीर्घकालात् योगदानं दत्तम् अस्ति। दशहरा-महोत्सवसदृशानां बृहदायोजनानां सफलतायामपि कार्यकर्तॄणां महत्त्वपूर्णा भूमिका तिष्ठति।

सः अवदत् यत् यदि तस्मै मन्त्रिमण्डलस्तरः (कैबिनेट्-दर्जा) दातुं वार्ता कथिता आसीत्, तर्हि अस्मिन् विलम्बः किमर्थं भवति, अस्य उत्तरं सम्बद्धजनैः दातव्यम्। कार्यकर्तृभ्यः स्ववार्तां स्थापने सूचनापत्रं (नोटिस्) दातुं स्थाने तेषां समस्याः श्रोतव्याः। 'ऑपरेशन-लोटस्' इत्यस्य उल्लेखं कुर्वन् सः अवदत् यत् राजनैतिकसङ्कटस्य अन्तराले सः दृढतया दलेन सह स्थितः आसीत्। कुल्लू-क्षेत्रात् केनापि द्वैतचरित्रं (डबल् स्टैण्डर्ड्) न प्रदर्शितम् अस्ति। सः अकथयत् यद् आगामिनि समये कार्यकर्तृभ्यः सामान्यजनतायाश्च प्रतिपुष्टिं (फीडबैक्) गृहीत्वा अग्रिमा रणनीतिः निश्चेष्यते।

१९ दिनाङ्के जोरावर-क्रीडाङ्गणे भविष्यति महिलानां प्रदर्शनम्, बिन्दलः अवदत्—पञ्चदशशतं न, द्विसप्ततिसहस्रं रूप्यकाणि अपेक्ष्यन्ते

हिमसंस्कृतवार्ता — काङ्गड़ा।

भारतीयजनतादलस्य (भाजपा) हिमाचलप्रदेशस्य प्रदेशपदाधिकारी-गोष्ठ्याः आयोजनं मङ्गलवासरे ऐतिहासिक्यां धार्मिकनगर्यां काङ्गड़ायां भाजपा-प्रदेशाध्यक्षस्य डॉ. राजीवबिन्दलस्य अध्यक्षतायां कृतम्। गोष्ठ्यां विशेषरूपेण पूर्वमुख्यमन्त्री प्रतिपक्षनेता च जयरामठाकुरः उपस्थितः आसीत्। अस्मिन् अवसरे प्रदेश-सङ्गठन-महामन्त्री सिद्धार्थनः, प्रदेशमहामन्त्री राज्यसभासांसदश्च डॉ. सिकन्दरकुमारः, प्रदेशमहामन्त्रिणौ सञ्जीवकटवालः पायलवैद्या च, काङ्गड़ा-संसदीयक्षेत्रस्य सांसदः डॉ. राजीव-भारद्वाजः तथा विधायकः पवनकाजलः सहितं दलस्य प्रदेशपदाधिकारिणः उपस्थिताः आसन्।गोष्ठ्यां सङ्गठनात्मकगतिविधिषु, आगामिकार्यक्रमेषु, मोर्चाणां प्रकोष्ठानां च सक्रियतायां तथा च मतदानकेन्द्र-स्तरे (बूथ-स्तरे) दलं सुदृढतरं निर्मातुम् अधिकृत्य विस्तरेण चर्चा विहिता। गोष्ठीं सम्बोधयन् भाजपा-प्रदेशाध्यक्षः डॉ. राजीवबिन्दलः अवदत् यत् भारतीयजनतादलं हिमाचलप्रदेशे स्वकीयं सङ्गठनं सुव्यवस्थितं सक्रियतरं च विधातुं दिशि तीव्रगत्या अग्रे वर्धमानम् अस्ति। सः अकथयत् यत् दलस्य सर्वे मोर्चाः प्रकोष्ठाश्च पूर्णसक्रियतया सह सङ्गठनात्मककार्यक्रमान् अग्रे वर्धयन्ति तथा च आगामिषु दिनेषु समग्रप्रदेशे व्यापकस्तरे गतिविधयः आयोजयिष्यन्ते।

डॉ. राजीवबिन्दलः घोषणाम् अकरोत् यत् १९ नवम्बर्-दिनाङ्के धर्मशालायाः जोरावर-क्रीडाङ्गणे महत्यां संख्यायां महिलाः प्रदेश-काङ्ग्रेस-सर्वकारस्य विरुद्धं रोष-प्रदर्शनं करिष्यन्ति। सः प्रावोचत् यद् इदं प्रदर्शनं काङ्ग्रेस-सर्वकारस्य महिलाभ्यः प्रतिमासं पञ्चदशशतं (१५००) रूप्यकाणि दातुं निर्वाचन-प्रतिज्ञाम् अधिकृत्य आयोजयिष्यते।



सः अवदत् यत् प्रदर्शनस्य प्रमुखः उद्घोषः भविष्यति *—'पञ्चदशशतं न, द्विसप्ततिसहस्रं (७२,०००) रूप्यकाणि अपेक्ष्यन्ते; कतिपय-चयनितभगिन्यः न, अपि तु सर्वाभ्यः अष्टाविंशतिलक्ष-भगिनीभ्यः (२८ लक्ष) अधिकारः अपेक्ष्यते।'* सः अकथयत् यत् भाजपा-दलं महिलानाम् इमां याचनां प्रमुखतया उत्थापयिष्यति तथा च सर्वकारात् तस्य निर्वाचन-प्रतिज्ञायाम् उत्तरं याचिष्यते।

प्रदेशाध्यक्षः सूचितवान् यद् आगामिषु दिनेषु भाजपा-दलस्य विविधप्रकोष्ठानाम् एकः संयुक्तकार्यक्रमोऽपि आयोजयिष्यते। एतदतिरिच्य प्रथमात् दिसम्बर्-दिनाङ्कात् पञ्चविंशति-दिसम्बर्-दिनाङ्कं (२५ दिसम्बर्) यावत् प्रदेशस्य सर्वेषु अष्टषष्टि-विधानसभाक्षेत्रेषु (६८) 'सेवादूत-अभियानं' चालयिष्यते। अस्य अभियानस्य माध्यमेन सङ्गठनं मतदानकेन्द्र-स्तरं (बूथ-स्तरं) यावत् सुदृढं कर्तुं, कार्यकर्तॄणां सक्रियतां वर्धयितुं तथा जनसम्पर्कं व्यापकं निर्मातुं कार्यं विधास्यते। सः अवदत् यत् दलं प्रत्येकस्मिन् मतदानकेन्द्रे एकपञ्चाशत्-कार्यकर्तॄणां (५१) सशक्तसमूहं सज्जीकर्तुं दिशि तीव्रगत्या कार्यं कुर्वन् अस्ति।

हिमाचले प्रारब्धः प्रकम्पयन्त्याः शिशिरर्तोः क्रमः, घनीभवितुम् आरब्धानि निर्झराणि सरांसि च, अग्रे कीदृशं स्थास्यति ऋतुमानम्

हिमसंस्कृतवार्ता — शिमला।

हिमाचलप्रदेशस्य उच्चतायुक्तेषु क्षेत्रेषु शीतस्य प्रभावः वर्धितुम् आरब्धः अस्ति। जनजातीयक्षेत्रे लाहौल-स्पीति-मध्ये तापमानस्य शून्यात् अतीव अधः गमनानन्तरं निर्झराणां (झरनों), सरसां (झीलों), लघुजलप्रवाहाणां (नालों) च जलं घनीभवितुम् (जमना) प्रारब्धम् अस्ति। जनजातीयक्षेत्राणाम् उच्चतायुक्तेषु भागेषु प्राकृतिक-जलस्रोतेषु हिमस्य आवरणं संलीयते। राज्यस्य अन्येष्वपि भागेषु रात्रयः शीतलाः भवितुम् आरब्धाः सन्ति। मङ्गलवासरे लाहौल-स्पीति-मण्डलस्य कुकुमसेरी-स्थले न्यूनतमं तापमानं ऋणात्मक-चतुर्दशमलव-एक (-१४.१) डिग्री-सेल्सियस् तथा केलाङ्ग-नगरे ऋणात्मक-त्रिदशमलव-त्रि (-३.३) डिग्री-सेल्सियस् पञ्जीकृतम्। अपरत्र, मनाली-नगरस्य न्यूनतमं तापमानं द्विदशमलव-अष्ट (२.८) डिग्री-सेल्सियस् अतिष्ठत्।

ऋतुविज्ञान-विभागस्य अनुसारेण प्रदेशे २३ नवम्बर्-दिनाङ्कं यावत् ऋतुमानं स्वच्छं स्थातुम् अनुमानम् अस्ति। अस्मिन् अन्तराले राज्ये कुत्रापि वृष्टेः हिमपातस्य वा सम्भावना नास्ति। मङ्गलवासरे शिमला-मनाली-सहितेषु प्रदेशस्य प्रमुखेषु पर्यटनस्थलेषु आतपः विकसितः अस्ति। दिवसकाले ऋतुमानं सुखदं विद्यते, यदा तु रात्रेः तापमाने न्यूनताकारणात् शीतं वर्धमानम् अस्ति। विगतचतुर्विंशतिहोरासु प्रदेशस्य औसत-न्यूनतमतापमाने शून्यदशमलव-त्रि (०.३) डिग्री-सेल्सियस्-परिमिता न्यूनता पञ्जीकृता। इदं सामान्यात् शून्यदशमलव-चतुः (०.४) डिग्री-सेल्सियस् न्यूनम् अतिष्ठत्। प्रदेशस्य अष्टसु ऋतुविज्ञान-केन्द्रेषु न्यूनतमं तापमानं सामान्यात् अधः पञ्जीकृतम्। एतेषु पालमपुरे सामान्यात् द्विदशमलव-नव (२.९) डिग्री वर्तते।

विधानसभायां भ्रष्टाचारविषये सङ्ग्रामः, मुख्यमन्त्री सुक्खूः

अवदत्—हिमाचलस्य सम्पदां लुण्ठयितॄन् कारागारं प्रेषयिष्यामः



हिमसंस्कृतवार्ता — धर्मशाला।हिमाचलप्रदेश-विधानसभायाः शीतकालीन-अधिवेशनस्य द्वितीये दिने भ्रष्टाचारस्य सर्वकारीयसम्पत्तीनां कथित-दुरुपयोगस्य च विषये सदने सत्तापक्ष-प्रतिपक्षयोः मध्ये तीक्ष्णः वादविवादः अभवत्। मुख्यमन्त्री सुखविन्दरसिंहसुक्खू-महोदयः प्रावोचत् यत् भ्रष्टाचारस्य प्रकरणेषु सर्वकारः कठोरं कार्याचरणं कुर्वन् अस्ति तथा च 'शून्य-सहिष्णुतायाः' (जीरो टॉलरेन्स्) नीत्यां कार्यं क्रियते। सः स्पष्टतया अवदत् यत् हिमाचलस्य सम्पदां लुण्ठयितारः कारागारस्य शलाकानां पृष्ठतः प्रापयिष्यन्ते। येषां जनानां विरुद्धं तथ्यानि सम्मुखम् आगमिष्यन्ति, तेषां विरुद्धं विधिकं कार्याचरणं विधास्यते।

मुख्यमन्त्री अकथयत् यत् सर्वकारेण पूर्वमपि कार्याचरणं कृतम् आसीत्, किन्तु एकं विधायकं मोचयितुम् अष्टादश (१८) विधायकाः सतर्कता-कार्यालयं (विजिलेंस-कार्यालयं) प्राप्तवन्तः आसन्। सः प्रश्नम् उत्थापितवान् यत् किम् एतादृशानि प्रकरणानि केनचित् भाजपा-विधायकेन प्रोत्साहितानि तु न कृतानि? सः अवदत् यत् पञ्चसप्ततिवर्षाणाम् (७५) अनन्तरं राजस्व-न्यूनता-अनुदानं (RDG) पिहितं कृतम् अस्ति, तथापि सर्वकारः प्रदेशस्य हितानां रक्षणाय कार्यं कुर्वन् अस्ति। भ्रष्टाचारस्य प्रकरणेषु आरोपपत्रमपि (चार्जशीट्) उपस्थापितम् अस्ति तथा च तथ्यानाम् आधारेण अग्रेऽपि कार्यविधिः प्रचलती स्थास्यति। मुख्यमन्त्री एकस्य पूर्व-काङ्ग्रेसनेतुः वर्तमान-भाजपा-सांसदस्य च उल्लेखं कुर्वन् अवदत् यत् तस्य विरुद्धं पूर्वसर्वकारस्य कार्यकाले प्रकरणं पञ्जीकृतम् आसीत्। (अपरपक्षतः) प्रदेशे निर्वाचितानां जनप्रतिनिधीनां विरुद्धं राजनैतिकप्रकरणानि पञ्जीकृतानि सन्ति। आरोपः आरोपितः यत् बहुषु प्रकरणेषु अकारणं कार्यविधिः कृता अस्ति, यदा तु पूर्वसर्वकारस्य समये अनेन प्रकारेण प्रकरणानि न पञ्जीकृतानि आसन्। सर्वकारस्य पक्षतः गठितासु समितिषु प्रश्नम् उत्थापयता कथितं यत् अधुनावधि आरोपपत्रं (चार्जशीट्) चालानपत्रं च अपि न सञ्जाते स्तः।

इतः पूर्वं चौपाल-क्षेत्रस्य विधायकः बलबीरसिंहवर्मा स्थगनप्रस्तावे चर्चां कुर्वन् सर्वकारस्य उपरि कोटिरूप्यकाणाम् ऋणं गृहीत्वा अपि विकासकार्याणि न कारयितुम् आरोपम् आरोपितवान्। सः अवदत् यत् केन्द्रसर्वकारात् प्राप्यमाणम् आयव्ययकमपि (बजट-राशिम्) विकृतं कृत्वा प्रस्तूयते। कोषागार-व्यवस्थायाम् (ट्रेजरी-व्यवस्थायाम्) अपि प्रश्नम् उत्थापयन् तेन आरोपः आरोपितः यद् इयं पूर्णतया पिहिता कृता अस्ति तथा च भ्रष्टाचारः प्रोत्साह्यते। विधायकानां देयकपत्राणि (बिलानि) अपि न स्वीक्रियन्ते तथा च स्वीकृतिपत्रस्य (सैंक्शन् लेटर्) प्राप्तेः अनन्तरमपि देयकानि (भुगतानम्) स्थग्यन्ते।

जनगणनायां मातृभाषारूपेण

संस्कृतभाषायाः उल्लेखनाय आह्वानम्



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, नवदिल्ली। आसन्नायां जनगणनायां संस्कृतभाषायाः गौरवपूर्णं स्थानं सुनिश्चितं कर्तुं संस्कृतानुरागिणां समक्षम् एकः महत्त्वपूर्णः अवसरः समुपस्थितः अस्ति। जनगणनायाः प्रश्नक्रमाङ्के १४ मध्ये मातृभाषायाः तथा अन्यासां ज्ञातानां भारतीयभाषाणां विषये सूचना प्रष्टव्या अस्ति। अस्मिन् सन्दर्भे केन्द्रीय- संस्कृत-विश्वविद्यालयस्य कुलपतिः प्रो. श्रीनिवास वरखेडीमहोदयः संस्कृतभाषायाः प्रचारप्रसाराय जनसामान्यं प्रति विशेषम् आह्वानं कृतवान्। तेन उक्तं यत् जनगणनायां प्रत्येकः संस्कृतभाषानुरागी स्वीयां मातृभाषां, ज्ञातासु भारतीयभाषासु च संस्कृतभाषायाः उल्लेखं कर्तुं प्रेरयेत्।

एकैकस्य व्यक्तेः सहभागितया संस्कृतभाषायाः गणना वर्धिष्यते, तस्याः सामाजिकं सांस्कृतिकं च महत्त्वं सुदृढं भविष्यति। अतः सर्वे भारतीयाः स्वयम् अस्मिन् अभियाने सहभागीभूत्वा अन्यान् अपि संस्कृतभाषायाः उल्लेखनाय प्रेरयेयुः इति तस्य सन्देशः अस्ति। क्षकाणां शङ्कानां समाधानं कृतम्। अस्मिन् कार्यक्रमे समन्वयकरूपेण डॉ. देवकीनन्दनः (भाषाशिक्षाविभागः,, प्रो. जतीन्द्रमोहनमिश्रमहोदयः, डॉ. मनीष-शर्मामहोदयः, श्रीजगन्नाथ- संस्कृत-विश्वविद्यालयस्य शिक्षाशास्त्रविभागस्य प्राचार्यः डॉ. जोगेश्वरमहन्तः, डॉ. लक्ष्मीधरपण्डा (स्थानीयसमन्वयकः), अन्ये आचार्याः, ओडिशाराज्यस्य विभिन्नविद्यालयानां संस्कृतशिक्षकाः च उपस्थिताः आसन्।

चूड़ामणि-संस्कृत-संस्थाने गोपाष्टमी-महोत्सवे बटुकैः भव्यायाः शोभायात्रायाः आयोजनम्, 'गौमाता राष्ट्रमाता' इति जयघोषैः गुंजितं समस्तं परिवेशम्



हिमसंस्कृतवार्ता। गोपाष्टमी-पर्वणः पावनावसरे चूड़ामणि- संस्कृत- संस्थाने, विश्वस्थल्यां श्रद्धायाः, अनुशासनस्य भारतीय-संस्कृतेश्च अद्भुता छटा अवलोकिता। अस्मिन् शुभावसरे संस्थानस्य बटुकाः पारम्परिक- वेषभूषाभिः सुसज्जिताः भूत्वा जञ्जघर-स्थितां गोशालां प्रति भव्याम् आकर्षकां च शोभायात्राम् अनयन्। यात्रायाः अवसरे विद्यार्थिनां मधुरकण्ठेभ्यः निःसृतैः वैदिकमन्त्रैः तथा 'गौमाता राष्ट्रमाता' इति गगनभेदीभिः जयघोषैः समग्रः परिसरः भक्तिरसेन आप्लावितः अभवत्। अस्याः सम्पूर्णायाः शोभायात्रायाः सुव्यवस्थितं शृङ्खलाबद्धं च सञ्चालनं गन्तव्यस्थानपर्यन्तं निर्विघ्नतया सम्पादयितुं अर्जुनशर्मा, अजयशर्मा, अन्ये सहयोगिनः च महत्त्वपूर्णं दायित्वं कुशलतया निर्वहन्ति स्म।अस्मिन् गरिमामये आयोजने वरिष्ठस्य शिक्षाविदः रमणशर्मणः विशिष्टोपस्थित्या समारोहस्य गौरवं वर्धितम्। गोशालाप्राङ्गणे समागत्य वैदिकाचार्यस्य वेदमूर्तेः हनीशकुमारस्य कुशलनिर्देशने सर्वैः विद्यार्थिभिः शास्त्रोक्तविधिना विधानपूर्वकं च गोमातुः पूजनं कृतम्। बटुकाः श्रद्धापूर्वकं गोमातुः पुरतः नैवेद्यं समर्प्य समस्तस्य विश्वस्य कल्याणाय, शान्तये, समृद्धये च मङ्गलकामनां व्याहरन्। कार्यक्रमे सम्बोधयन् गुरुकुलस्य प्राचार्यः डॉ. सौम्यरञ्जनमहापात्रः गोमातुः महत्त्वमुपरि स्वविचारान् प्रस्तुतवान्। तेन कथितं यत् सनातनपरम्परायां गौः केवलं पूजनीया एव न, अपितु समग्रमानवतेः पोषणस्य संवर्धनस्य च महत्त्वपूर्णम् आधारभूता अस्ति। डॉ. महापात्रः विशेषरूपेण प्रतिपादितवान् यत् अद्यतनया युवापीढ्या प्राचीनाभिः वैदिकपरम्पराभिः गोसेवया च सह सम्बद्धं भवितव्यम्। यतः एते एव संस्काराः भविष्ये सशक्तस्य संवेदनशीलस्य च समाजस्य सुदृढां आधारशिलां स्थापयन्ति। अन्ते सर्वैः गोमातुः संरक्षणाय, संवर्धनाय, सेवायै च सामूहिकः सङ्कल्पः स्वीकृतः।

उत्तरप्रदेशस्य प्रमुखेषु द्रुतमार्गेषु शीतकालीनायाः गतिसीमायाः प्रवर्तनम्

हिमसंस्कृतवार्ताःवृजेश कुमार पाण्डेय लखनऊम्। उत्तरप्रदेशराज्यस्य प्रमुखेषु द्रुतमार्गेषु शीतकालस्य दृष्ट्या वाहनानां गतिसीमा निर्धारितावधौ प्रवर्तिता अस्ति। इयं व्यवस्था २०२६ तमस्य वर्षस्य नवम्बरमासस्य पञ्चदशदिनाङ्कात् २०२७ तमस्य वर्षस्य फरवरीमासस्य पञ्चदशदिनाङ्कपर्यन्तं प्रभावी भविष्यति।निर्धारितनियमानुसारं प्रतिदिनं प्रातः अष्टवादनात् रात्रौ अष्टवादनपर्यन्तं वाहनचालकैः निर्धारितायाः गतिसीमायाः पालनं करणीयम्।विशेषतः शीतकालीनकुहेलिकायाः शैत्यस्य च कारणेन मार्गेषु दुर्घटनानां सम्भावना वर्धते।

श्रीजगन्नाथ- संस्कृत- विश्वविद्यालययोः संयुक्ततत्त्वावधाने पञ्चदिवसीय- क्षमतासंवर्धनकार्यक्रमे डॉ. परमेशशर्मणः विशेषव्याख्यानम्





हिमसंस्कृतवार्ताः- पूरी, ओडिशा। भाषाशिक्षाविभागः, राष्ट्रिय- शैक्षिकानुसन्धान- प्रशिक्षणपरिषद्, नवदेहली, शिक्षाशास्त्रिविभागः, श्रीजगन्नाथ- संस्कृत- विश्वविद्यालयः, श्रीविहारः, पुरी इत्यनयोः संयुक्ततत्त्वावधाने 16 तः 20 नवम्बर, 2026 पर्यन्तं पञ्चदिवसीयः क्षमतासंवर्धनकार्यक्रमः आयोज्यते। ओडिशाराज्यस्य प्रशिक्षित- स्नातक- संस्कृत- शिक्षकाणां कृते 'नवीनपाठ्यक्रमः संस्कृतपाठ्यपुस्तकानि च' इति विषयं आधारीकृत्य आयोजितस्य अस्य कार्यशालायाः द्वितीयदिवसे (17 नवम्बर, 2026) विषयविशेषज्ञरूपेण डॉ. परमेशकुमारशर्मामहोदयेन ज्ञानवर्धकं व्याख्यानं प्रस्तुतम्।

॥संस्कृतमाध्यमेन संस्कृतशिक्षणम्॥

'संस्कृतमाध्यमेन संस्कृतशिक्षणम्' इति विषये वदन् डॉ. शर्मामहोदयः भाषाशिक्षणस्य वैज्ञानिक- व्यावहारिक- पद्धतीनां विषये विस्तरेण प्रकाशं प्राक्षिपत्। तेन भाषायाः चत्वारि प्रमुखानि सोपानानि विवृतानि- 1. श्रवणम्- धैर्येण श्रवणम् 2. भाषणम्- लज्जात्यागेन भाषणम् 3. पठनम्- असन्तोषं विना त्रुटिभ्यः शिक्षणम्4. लेखनम्- निरन्तराभ्यासेन पुनरावृत्या च लेखनम् तेन शिक्षकेभ्यः आह्वानं कृतं यत् ताः छात्रान् भीषयित्वा, तर्जयित्वा वा न, अपि तु स्वाध्यायाय स्वपठनाय च प्रेरयेयुः। येन तेषु धाराप्रवाहिता, शुद्धता, शब्दसम्पत्तिः, परिष्कृता भाषाशैली च विकसिष्यति। व्याकरणं भाषायाः प्राणः इति प्रतिपादयन् डॉ. शर्मामहोदयः उक्तवान् यत् कठिनशब्दानां निवारणं सरलभाषया, प्रत्यक्षप्रदर्शनेन, अभिनयेन, वाक्यप्रयोगेण च करणीयम्। प्रभाविशिक्षणाय त्रयः तत्त्वाः अत्यन्तम् आवश्यकाः इति तेन प्रतिपादितम्-

1. विषयप्रियत्वम् 2. छात्रप्रीतिः
3. लक्ष्यप्रीतिः तदतिरिक्तं कक्षायां संस्कृतमयं वातावरणनिर्माणार्थं श्लोकाः, पत्रलेखनम्, निबन्धः, कलामाध्यमाः- नाटकं, गीतगायनम्, अभिनयः च- एतेषां प्रयोगे बलं दत्तम्।

प्रौद्योगिक्याः उपयोगः-आधुनिकतकनीकी-युगस्य अनुरूपं डॉ. शर्मामहोदयेन संस्कृतशिक्षणे प्रौद्योगिक्याः उपयोगस्य व्यावहारिकं प्रदर्शनम् अपि कृतम्। तेन उक्तं यत् ध्वनिमुद्रणं, शैक्षणिकचलचित्रम्, डिजिटलमञ्चाः इत्येतैः ऑनलाइन- संस्कृत- सम्भाषण- शिबिराणां आयोजनं कृत्वा शिक्षणम् अत्यन्तं रोचकं प्रभाविनं च कर्तुं शक्यते।

संस्कृतशिक्षणं संस्कारशिक्षणम्-व्याख्यानस्य उपसंहारे डॉ. शर्मामहोदयेन स्पष्टं कृतं यत् संस्कृतशिक्षणं केवलं भाषायाः शिक्षणं नास्ति, अपितु संस्कारशिक्षणम् अस्ति। अनेन छात्रेषु विनयः, गुरुसेवा, सत्यभाषणम्, स्वाध्यायः, देशप्रेमः इत्यादयः जीवनमूल्यानि प्रतिष्ठाप्यन्ते।

श्रीत्रिदण्डिदेवसत्सङ्गाश्रमे डिसेम्बरमासे त्रिदिवसीयः श्रीरामविवाहमहोत्सवः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, डेहरी आनसोनम् (रोहतासः, बिहारम्)। बिहारराज्यस्य रोहतासजनपदस्य डेहरी आनसोननगरे स्थिते श्रीत्रिदण्डिदेव- सत्सङ्गाश्रम- सेवाट्रस्ट-परिसरे आगामी २०२६ तमस्य वर्षस्य दिसम्बरमासस्य १२ दिनाङ्कतः १४ दिनाङ्कपर्यन्तं त्रिदिवसीयस्य भव्यस्य श्रीरामविवाहमहोत्सवस्य आयोजनं भविष्यति। अस्मिन् पावने धार्मिके आयोजने श्रीरामकथायाः अपि भव्यः कार्यक्रमः समायोजयिष्यते। अस्य महोत्सवस्य आध्यात्मिकं मार्गदर्शनं जगद्गुरुणा श्रीरङ्गनाथाचार्यमहाराजेन प्रदास्यते। तस्य सान्निध्ये श्रीरामविवाहमहोत्सवस्य आयोजनं भक्तानां श्रद्धालूनां च कृते विशेषम् आध्यात्मिकं सौभाग्यं भविष्यति। श्रीरामसीतयोः दिव्यविवाहः भारतीय- सनातन- संस्कृतेः महत्त्वपूर्णः धार्मिकः प्रसङ्गः अस्ति। अयं विवाहोत्सवः प्रेम्णः, त्यागस्य, समर्पणस्य, मर्यादायाः, आदर्शगृहस्थजीवनस्य च दिव्यः सन्देशं प्रसारयति। भगवान् श्रीरामः मर्यादापुरुषोत्तमत्वस्य आदर्शः, भगवती सीता पतिव्रतधर्मस्य, त्यागस्य, धैर्यस्य च प्रतिमूर्तिः अस्ति। अतः श्रीरामविवाहोत्सवः न केवलं धार्मिकः समारोहः, अपि तु भारतीयसंस्कृतेः पारिवारिकमूल्यानां च संरक्षणस्य प्रेरणास्रोतः अपि अस्ति। आयोजकसंस्थया प्रदत्तसूचनानुसारम् उत्सवस्य कथास्थलं श्रीत्रिदण्डि- देवसत्सङ्गाश्रम-सेवाट्रस्ट, डेहरी आनसोनम्, रोहतासजनपदम्, बिहारराज्यम् इति निर्धारितम् अस्ति। अस्मिन् त्रिदिवसीये महोत्सवे बहवः सन्तः, महात्मानः, धर्माचार्याः, भक्ताः, श्रद्धालवः च समागत्य भगवतः श्रीसीतारामयोः कृपाम् अवाप्स्यन्ति इति अपेक्षा अस्ति। अतः समस्तेभ्यः धर्मप्रेमिभ्यः, श्रद्धालुभ्यः, भक्तजनेभ्यः च आयोजकसंस्थया सादरं निमन्त्रणं प्रदत्तम् अस्ति यत् ते अधिकाधिकसङ्ख्यया समागत्य श्रीरामविवाहमहोत्सवे श्रीरामकथायां च सहभागिनः भूत्वा धर्मलाभं प्राप्नुयुः।

महोत्सवस्य विवरणम्- आयोजनम्- श्रीरामविवाह-महोत्सवः एवं श्रीरामकथा।

दिनाङ्कः- १२ दिसम्बरतः १४ दिसम्बर २०२६ पर्यन्तम्। आयोजकः- श्रीत्रिदण्डिदेवसत्सङ्गाश्रम-सेवाट्रस्ट्। आध्यात्मिकं मार्गदर्शनम्- जगद्गुरुः श्रीरङ्गनाथाचार्यमहाराजः। स्थानम्- श्रीत्रिदण्डिदेवसत्सङ्गाश्रमः, डेहरी आनसोनम्, रोहतासः, बिहारम्। सम्पर्कसूत्रम्- ९४३०४३२५९४, ६२०२४९९७६६। संस्कृतभाषा अस्माकं प्राचीनायाः भारतीयज्ञानपरम्परायाः सांस्कृतिक- वैभवस्य च अमूल्यनिधिः अस्ति। अतः तस्याः संरक्षणं संवर्धनं च सर्वेषाम् अस्माकं सामूहिकं दायित्वम् अस्ति। जयतु संस्कृतम्! जयतु भारतम्!

"क्रीडाक्रियाकलापानाम् समर्थनार्थं केपीएमजी प्रौद्योगिकीसंस्था।"

भारतस्य क्रीडा-उद्योगः महत्त्वपूर्ण-व्यापार- अवसररूपेण उद्भवति



हिमसंस्कृतवार्ताः- २०३०-३१ यावत् क्रीडाविपण्यं ४२ बिलियन डॉलरं यावत् भविष्यति इति अनुमानितम् अस्ति। व्यावसायिक- क्रीडासङ्घेषु, क्रीडासंरचनासु, क्रीडकविकासेषु, क्रीडायाः अङ्कीयमञ्चेषु वर्धमाननिवेशः क्रिकेट-क्रीडायाः परं अवसरान् उद्घाटयति। २०३० राष्ट्रमण्डलक्रीडाः, २०३६ ओलम्पिकक्रीडायाः आतिथ्यं कर्तुं भारतस्य महत्त्वाकांक्षा च अस्मिन् क्षेत्रे व्ययस्य त्वरिततां कर्तुं शक्नोति। अद्यैव केपीएमजी-संस्थायाः बेङ्गलूरुनगरे स्वस्य क्रीडाप्रौद्योगिकीकेन्द्रस्य अनावरणं कृतम् अस्ति। एतत् एआइ, उन्नतविश्लेषणं, सङ्गणकीकृतक्रीडकानां प्रशिक्षणं, क्रीडा-अन्तर्दृष्टिः, अङ्कीयमञ्चाः, बृहत्- परिमाणस्य आयोजनानां योजनां प्रबन्धनं च एकत्र आनयति। २०२५ तमे वर्षे क्रीडा-उद्योगः १९ बिलियन-डॉलर आसीत्, अस्मिन् वर्षे च प्रायः २१ बिलियन-डॉलर आसीत्, १२% तः १४% पर्यन्तं वर्धमानः च। बेङ्गलुरु नगरे केपीएमजी केन्द्रम् समाधानं विकसितुं यत् क्रीडक-प्रदर्शनम् आधुनिक- प्रौद्योगिकी-युक्त- क्रीडाङ्गणानि यावत् व्याप्नोति।

मथुरायां भाजपा-उत्तरप्रदेशस्य योजनासभायाः द्वितीयदिने सङ्घटनात्मक- उपवेशने राष्ट्रियाध्यक्षस्य नितिन-नवीनस्य मार्गदर्शनम्



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, मथुरा। अन्त्योदयस्य प्रणेता, एकात्ममानववादस्य प्रवर्तकः च पण्डितदीनदयाल-उपाध्यायस्य जन्मभूमौ मथुरायां भारतीयजनतापक्षस्य उत्तरप्रदेश- एककेन आयोजितायाः योजनासभायाः द्वितीयदिने भारतीयजनतापक्षस्य माननीयः राष्ट्रियाध्यक्षः नितिन-नवीनमहोदयः सङ्गठनात्मके उपवेशने उपस्थाय कार्यकर्तृभ्यः वरिष्ठपदाधिकारिभ्यश्च मार्गदर्शनम् अकरोत्।अस्मिन् अवसरे उत्तरप्रदेशस्य माननीयः मुख्यमन्त्री योगी आदित्यनाथः, राष्ट्रियः सङ्गठनमहामन्त्री बी. एल. सन्तोषः, माननीयः प्रदेशाध्यक्षः पङ्कज चौधरी, माननीयौ उपमुख्यमन्त्री केशवप्रसादमौर्यः, ब्रजेशपाठकः, अन्ये च वरिष्ठाः पदाधिकारिणः उपस्थिताः आसन्। उपवेशने आगामी-विधानसभा- निर्वाचनस्य सज्जतायाः, सङ्गठनस्य सुदृढीकरणस्य, जनसम्पर्काभियानस्य, विविधासु राजनैतिकेषु सङ्गठनात्मकासु च योजनासु विस्तृततया विचारविमर्शः अभवत्।अवसरेऽस्मिन् वरिष्ठैः नेतृभिः आगामी- विधानसभानिर्वाचनं दृष्ट्वा सङ्गठनस्य कार्यदिशा, कार्यकर्तृणां सक्रियता तथा जनसामान्येन सह सततसम्पर्कस्य आवश्यकता च विशेषतया चर्चिता। अन्त्योदयस्य विचारधाराम् आधारीकृत्य जनसेवायाः सङ्कल्पं सुदृढीकुर्वन्तः नेतारः आगामीनिर्वाचनाय सङ्गठनस्य सज्जतां सुदृढां कर्तुं विचारान् प्रस्तुतवन्तः।

विश्वविद्यालयानुदानायोगस्य महत्त्वपूर्णः निर्णयः- पूर्वप्राप्ताः द्वयः शैक्षणिकोपाधयः अपि भविष्यन्ति मान्याः, प्राचीनच्छात्राणामपि भविष्यति लाभः



हिमसंस्कृतवार्ताः- नवदेहली। राष्ट्रियशिक्षानीतेः (२०२०) अन्तर्गतं एकस्मिन्नेव काले द्वयोः शैक्षणिककार्यक्रमयोः अध्ययनं कृत्वा पृथक्- पृथक् उपाधिप्राप्तेः व्यवस्थायाः विषये विश्वविद्यालय- अनुदानायोगेन महत्त्वपूर्णः निर्णयः घोषितः। अस्य निर्णयस्य अनुसारं पूर्वम् एकस्मिन्नेव काले द्वयोः शैक्षणिकोपाध्योः प्राप्तवन्तः छात्राः अपि निर्धारितमानदण्डानां पूर्तौ तयोः उपाध्योः मान्यतां प्राप्स्यन्ति। पूर्वं विश्वविद्यालयानुदानायोगेन द्वयोः शैक्षणिककार्यक्रमयोः एकस्मिन्नेव काले अध्ययनार्थं मार्गदर्शिकाः निर्गताः आसन्। तदनन्तरं नवीननियमानुसारं छात्राः एकस्मिन्नेव समये द्वयोः भिन्नयोः पाठ्यक्रमयोः अध्ययनं कर्तुं शक्नुवन्ति। अधुना आयोगेन पूर्वमेव एतादृशीं द्वयोरुपाध्योः प्राप्तिं कृतवन्तः छात्रान् अपि निर्धारितशर्तानां पूर्तौ मान्यतां प्रदातुं स्वीकृतम्।पूर्वप्राप्तोपाधीनां मान्यतायाः व्यवस्था- आयोगस्य स्पष्टीकरणानुसारं मार्गदर्शिकानां निर्गमनात् पूर्वं ये छात्राः द्वयोः शैक्षणिककार्यक्रमयोः एकस्मिन्नेव काले अध्ययनं कृतवन्तः, तेषाम् उपाधयः अपि मान्याः भविष्यन्ति; परन्तु ताभिः उपाधिभिः सम्बन्धिताः विश्वविद्यालय- अनुदानायोगस्य प्रथमोपाधि-सम्बद्धाः स्नातकोत्तरशिक्षासम्बद्धाः च नियमाः तथा सम्बन्धितविश्वविद्यालयस्य विनियमाः, अधिनियमाः एवं उपविधयः पालिताः स्युः।

द्वयोरुपाध्योः कृते प्रमुखाः नियमाः-

१. समानशैक्षणिकस्तरः- उभे अपि उपाधी समानशैक्षणिकस्तरस्य भवितव्ये। यथा- द्वे स्नातकस्तरीये उपाधी अथवा द्वे स्नातकोत्तरस्तरीये उपाधी। एकस्मिन्नेव काले स्नातकस्तरीयायाः स्नातकोत्तरस्तरीयायाश्च उपाध्योः अध्ययनं कर्तुं न शक्यते।

२. भिन्नविश्वविद्यालयेषु अध्ययनस्य अनुमतिः- छात्राः एकस्मादेव विश्वविद्यालयात् अथवा भिन्नाभ्यां विश्वविद्यालयाभ्यां द्वे उपाधी प्राप्तुं शक्नुवन्ति।

३. नियमिताध्ययनस्य व्यवस्था- नियमितपाठ्यक्रमयोः एकस्मिन्नेव काले अध्ययनं कर्तुं शक्यते, किन्तु उभयोः पाठ्यक्रमयोः कक्षासमयः परस्परं न बाधेत।

४. मिश्रिताध्ययनस्य विकल्पः- छात्राः एकस्मिन् नियमितपाठ्यक्रमेण सह अन्यस्मिन् ऑनलाइन अथवा दूरस्थशिक्षामाध्यमेन अध्ययनं कर्तुं शक्नुवन्ति।

५. ऑनलाइन-दूरस्थशिक्षा- छात्राः एकस्मिन्नेव काले द्वयोः पाठ्यक्रमयोः ऑनलाइन अथवा दूरस्थशिक्षामाध्यमेन अपि अध्ययनं कर्तुं शक्नुवन्ति।

६. व्यावसायिकपाठ्यक्रमाणां नियमाः- यदि कश्चन पाठ्यक्रमः सम्बन्धितस्य वैधानिक-व्यावसायिक- परिषदः अथवा विश्वविद्यालयानुदानायोगस्य दूरस्थशिक्षाविभागस्य नियमानाम् अधीनः अस्ति, तर्हि तेषां नियमानामपि पालनम् अनिवार्यम्।

छात्राणां कृते लाभः- अस्य निर्णयस्य फलस्वरूपं छात्राः स्वाभिरुचिभिः सह अनेकविषयेषु ज्ञानं प्राप्तुं शक्नुवन्ति। समयस्य सदुपयोगः भविष्यति तथा शैक्षणिकयोग्यतायाः विकासाय नूतनाः अवसराः अपि उद्घाटिताः भविष्यन्ति। विशेषतः पूर्वं द्वयोरुपाध्योः अध्ययनं कृतवन्तः छात्राः निर्धारितनियमानां पूर्तौ लाभान्विताः भविष्यन्ति। अयं निर्णयः उच्चशिक्षाक्षेत्रे महत्त्वपूर्णं परिवर्तनम् अस्ति। अनेन छात्राणां कृते बहुविषयकाध्ययनस्य अवसराः वर्धिष्यन्ते तथा उच्चशिक्षायाः क्षेत्रे अधिकाः सम्भावनाः विकसिताः भविष्यन्ति।

प्रतापगढस्य कुण्डानगरे श्रीरामकथायाः पूर्वं कृताः व्यापकाः सुरक्षाव्यवस्थाः, सहस्रं पुलिसकर्मचारिणः द्विशतं सीसीटीवी-कैमरे च करिष्यन्ति निगरानीम्।

हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, प्रतापगढम्। उत्तरप्रदेशस्य प्रतापगढजनपदस्य कुण्डानगरे बागेश्वरधाम्नः पीठाधीश्वरस्य पण्डित धीरेन्द्रकृष्णशास्त्रिणः श्रीरामकथायाः आयोजनं निमित्तीकृत्य सज्जताः अन्तिमचरणे सन्ति। नवम्बरमासस्य १७ दिनाङ्कात् २० दिनाङ्कपर्यन्तम् आयोज्यमानायाः अस्याः कथायाः कृते प्रशासनपक्षतः आरक्षीविभागपक्षतः च व्यापकाः सुरक्षाव्यवस्थाः विहिताः सन्ति। सम्पूर्णं कथास्थलं सुरक्षादृष्ट्या द्वयोः सुपरजोनयोः, सप्तसु जोनक्षेत्रेषु तथा पञ्चाशत् सेक्टरक्षेत्रेषु विभक्तम् अस्ति, येन सुरक्षाव्यवस्थायाः समुचितं सञ्चालनं भवेत्। सुरक्षाव्यवस्थायाः दायित्वं द्वयोः अपरपुलिसाधीक्षकयोः, क्षेत्राधिकारिणाम्, उपजिलाधिकारिणाम् अन्येषां च वरिष्ठाधिकारिणां हस्ते भविष्यति। कथास्थले वर्दीधारिणः आरक्षिणः साकं साधारणवेषधारिणः आरक्षिणः अपि नियुक्ताः भविष्यन्ति। सम्पूर्णस्य आयोजनस्य सुरक्षायै प्रायः सहस्रं पुलिसकर्मचारिणः नियोजिताः भविष्यन्ति। एतदतिरिक्तं प्रादेशिकसशस्त्रारक्षकबलस्य (पीएसी) द्वे वाहिन्यौ अपि सुरक्षाकार्ये संलग्ने भविष्यतः। आयोजनस्थले तदनुसारीषु च क्षेत्रेषु निगराण्यर्थं द्विशतं सीसीटीवी-कैमरे स्थापिताः सन्ति।



पुलिसनियन्त्रणकक्षात् सर्वासां गतिविधीनां सततं निरीक्षणं क्रियते। आकस्मिकपरिस्थितीनां सामना कर्तुं कथास्थले अस्थायी पुलिसस्थानकम् अपि स्थापितम् अस्ति।

प्रशासनस्य प्रमुखम् उद्देश्यम् अस्ति यत् कथाश्रवणाय समागच्छन्तः श्रद्धालवः सुरक्षितं वातावरणं प्राप्नुयुः तथा च सम्पूर्णम् आयोजनं शान्तिपूर्णतया निर्विघ्नतया च सम्पन्नं भवेत्।

सिद्धार्थनगरे शताधिकानां युगलानां सामूहिकविवाहः सम्पन्नः

संस्कृतविद्यालयानां ३९ शिक्षकाः, विद्वांसः, विद्यार्थिनश्च सहयोगे निरताः



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, सिद्धार्थनगरम्, मङ्गलवासरः, १७ नवम्बर २०२६। उत्तरप्रदेशस्य मुख्यमन्त्रिणः योगी आदित्यनाथस्य प्रेरणया सञ्चालितायाः 'मुख्यमन्त्री सामूहिक-विवाह- योजनायाः' अन्तर्गतं मङ्गलवासरे सिद्धार्थनगरजनपदस्य चिल्हियाक्षेत्रान्तर्गते कन्थास्थिते 'जनता विद्यामन्दिर-इण्टर-कॉलेज' इति विद्यालयस्य प्राङ्गणे भव्यः सामूहिक-विवाहसमारोहः हर्षोल्लासेन सम्पन्नः।

अस्मिन् माङ्गलिके समारोहे शोहरतगढक्षेत्रस्य माननीयः विधायकः विनयवर्मा मुख्यातिथिरूपेण उपस्थितः आसीत्। अस्मिन् समारोहे शताधिकानि वरवधूद्वन्द्वानि वैदिकविधिना अग्निसाक्षिकं सप्तपदीसंस्कारं सम्पन्नवन्ति। नवदम्पतीनां वैवाहिकजीवनस्य शुभारम्भेन सम्पूर्णं समारोहस्थलं माङ्गलिकवातावरणेन परिपूर्णम् अभवत्। कार्यक्रमे जनपदस्य विभिन्नेषु संस्कृतविद्यालयेषु कार्यरताः एकोनचत्वारिंशत् (३९) शिक्षकाः, विद्वांसः तथा विद्यार्थिनः विशेषरूपेण सहयोगं कृतवन्तः। तेषां सक्रियसहभागितया कार्यक्रमस्य व्यवस्थासु सञ्चालनकार्ये च महत्त्वपूर्णं योगदानं प्रदत्तम्।अस्मिन् अवसरे डुमरियागञ्जक्षेत्रस्य सांसदः जगदम्बिका पालवर्यः, इटवाक्षेत्रस्य विधायकः माताप्रसाद पाण्डेयवर्यः, बांसीक्षेत्रस्य विधायकः जयप्रतापसिंहवर्यः कपिलवस्तुक्षेत्रस्य विधायकः श्यामधनी राही, विधानपरिषदः सदस्यः सुभाष यदुवंशः च उपस्थिताः आसन्।एतेषाम् अतिरिक्तं जिलापञ्चायतस्य अध्यक्षा शीतल सिंहः, डुमरियागञ्जक्षेत्रस्य विधायिका श्रीमती सैय्यदा खातूनः, पूर्वमन्त्री सतीश द्विवेदी, पूर्वविधायकः राघवेन्द्र प्रताप सिंहः, श्रीध्रुवकुमार त्रिपाठी, देवेन्द्र प्रतापः, दीपक मौर्यः चापि कार्यक्रमे उपस्थिताः आसन्। प्रशासनिकपक्षतः जनपदस्य जिलाधिकारी गौरवसिंह सोगरवालः (IAS), वरिष्ठपुलिसाधीक्षकः श्रीअभिषेक महाजनः (IPS), मुख्यविकासाधिकारी श्रीबलराम सिंहः (IAS) तथा जिला- समाजकल्याणाधिकारी च कार्यक्रमस्य सफलसञ्चालनाय उपस्थिताः आसन्। समारोहे उपस्थितैः सर्वैः अतिथिभिः नवविवाहितदम्पतीभ्यः सुखमयस्य समृद्धस्य च दाम्पत्यजीवनस्य शुभाशयाः प्रदत्ताः। मुख्यमन्त्रिणः सामूहिक-विवाहयोजनया आर्थिकदृष्ट्या दुर्बलपरिवाराणां कन्यानां विवाहे महत्त्वपूर्णा सहायता प्राप्यते। अनेन आयोजनेन सामाजिकसमरसतायाः, सहयोगभावनायाः तथा सामूहिकमाङ्गल्यस्य च सुन्दरः सन्देशः प्रसारितः।

विशेषतः जनपदस्य संस्कृतविद्यालयानां ३९ शिक्षकाणां, विदुषां विद्यार्थिनां च सहभागिता संस्कृतशिक्षकसमाजस्य सामाजिकदायित्वबोधस्य प्रशंसनीयम् उदाहरणम् अभवत्।

गीतापश्नोत्तरी

प्रश्नः १. श्रीमद्भगवद्गीतायाः प्रथमोध्यायस्य त्रिंशत्तमे (३०) श्लोके अर्जुनस्य हस्तात् किं संसते (पतति)?उत्तरम् : गाण्डीवं धनुः। ("गाण्डीवं संसते हस्तात् त्वक्चैव परिदह्यते।")

प्रश्नः २. 'निमित्तानि च पश्यामि विपरीतानि केशव' इत्यत्र अर्जुनः कस्मिन् कर्मणि श्रेयः न अनुपश्यति?उत्तरम् : आहवे (युद्धे) स्वजनहनने। ("न च श्रेयोऽनुपश्यामि हत्वा स्वजनमाहवे।")

प्रश्नः ३. द्वात्रिंशत्तमे (३२) श्लोके अर्जुनः श्रीकृष्णं प्रति काः तिस्रः वस्तूनि न काङ्क्षति?
उत्तरम् : विजयं, राज्यं, सुखानि च। ("न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च।")

प्रश्नः ४. युद्धक्षेत्रे अवस्थिताः आचार्याः, पितरः, पुत्राः च किं त्यक्त्वा युद्धाय उपस्थिताः सन्ति?
उत्तरम् : प्राणान् धनानि च। ("त इमेऽवस्थिता युद्धे प्राणांस्त्यक्त्वा धनानि च।")

प्रश्नः ५. पञ्चत्रिंशत्तमे (३५) श्लोके अर्जुनः कस्य हेतोः अपि स्वजनान् हन्तुं न इच्छति?
उत्तरम् : त्रैलोक्यराज्यस्य हेतोः अपि (पृथिव्याः तु का कथा)। ("अपि त्रैलोक्यराज्यस्य हेतोः किं नु महीकृते।")

प्रश्नः ६. षट्त्रिंशत्तमे (३६) श्लोके धार्तराष्ट्रान् (कौरवान्) प्रति अर्जुनः किं विशेषणं प्रयुक्तवान्?
उत्तरम् : आततायिनः। ("पापमेवाश्रयेदस्मान् हत्वैतानाततायिनः।")

प्रश्नः ७. सप्तत्रिंशत्तमे (३७) श्लोके श्रीकृष्णाय किं सम्बोधनपदं प्रयुक्तम् अस्ति? उत्तरम् : माधव। ("तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान् स्वबान्धवान्। स्वजनं हि कथं हत्वा सुखिनः स्याम माधव॥")

प्रश्नः ८. अष्टत्रिंशत्तमे (३८) श्लोके केन कारणेन कौरवाणां चेतः (बुद्धिः) उपहतम् अस्ति?
उत्तरम् : लोभेन। ("यद्यप्येते न पश्यन्ति लोभोपहतचेतसः।")

प्रश्नः ९. 'कुलक्षयकृतं दोषम्' इति पदस्य समीचीनः समासविग्रहः कः अस्ति?
उत्तरम् : कुलस्य क्षयः (षष्ठी तत्पुरुषः), तेन कृतः (तृतीया तत्पुरुषः), तम् — कुलक्षयकृतम्।

गोरखपुरे सहस्राधिकेषु पदेषु आजीविकायाः सुवर्णावसरः, पञ्चत्रिंशत् सहस्ररूप्यकाणि यावत् मासिकं वेतनम्



हिमसंस्कृतवार्ताःवृजेश कुमार पाण्डेय

गोरखपुरम्, मङ्गलवासरः, १७ नवम्बर २०२६। उत्तरप्रदेशस्य युवभ्यः रोजगारान्वेषिभ्यश्च हर्षस्य वार्ता अस्ति। उत्तरप्रदेश-आजीविका-मिशनस्य अन्तर्गतं गोरखपुरस्य क्षेत्रीय-सेवायोजन-कार्यालयस्य तत्त्वावधाने चौरीचौरा-विधानसभाक्षेत्रे एकदिवसीयस्य बृहद्-आजीविकामेलायाः आयोजनं क्रियते।अस्मिन् आजीविकामेलायां विंशत्यधिकाः प्रतिष्ठिताः कम्पन्यः सहभागिन्यः भविष्यन्ति। ताभिः सहस्राधिकेषु रिक्तपदेषु अभ्यर्थिनां चयनं करिष्यते। चयनितेभ्यः अभ्यर्थिभ्यः प्रतिमासं द्वादशसहस्ररूप्यकात् पञ्चत्रिंशत्सहस्ररूप्यकाणि यावत् वेतनं प्रदास्यते।अस्मिन् मेलायां अष्टमकक्षातः स्नातक-स्नातकोत्तरपर्यन्तं तथा औद्योगिकप्रशिक्षणसंस्थानस्य (आईटीआई), पॉलिटेक्निक-संस्थानस्य, डिप्लोमापाठ्यक्रमस्य च योग्यतां धारयन्तः अभ्यर्थिनः आवेदनं कर्तुं शक्नुवन्ति। अष्टादशवर्षेभ्यः पञ्चचत्वारिंशद्वर्षपर्यन्तम् आयुः येषां भवति, ते अभ्यर्थिनः अस्य अवसरस्य लाभं ग्रहीतुं शक्नुवन्ति।आजीविकामेलायाः आयोजनं २०२६ तमस्य वर्षस्य नवम्बरमासस्य १९ दिनाङ्के, गुरुवासरे, प्रातः दशवादनात् भविष्यति। अस्य आयोजनस्य स्थानं गोरखपुरजनपदस्य चौरीचौरा-क्षेत्रान्तर्गते ब्रह्मपुर-विकासखण्डे, नयाबाजारस्य सोलाभारी-क्षेत्रे स्थितं जङ्गल-सुकुलपुर-सङ्ख्या-द्वि-ग्रामस्य सन्तरविदास-बालिका-इण्टर-महाविद्यालयम् अस्ति।अत्र विशेषतया ज्ञापितं यत् अभ्यर्थिनां चयनप्रक्रिया पूर्णतया निःशुल्का भविष्यति। अतः इच्छुकाः अभ्यर्थिनः स्वकीयैः शैक्षणिकयोग्यताप्रमाणपत्रैः, परिचयपत्रैः अन्यैः आवश्यकैः दस्तावेजैश्च सह निर्धारितसमये आजीविकामेलास्थलं प्राप्नुवन्तु।इच्छुकाः अभ्यर्थिनः निःशुल्कपञ्जीकरणार्थम् अधोलिखितस्य जालपुटस्य माध्यमेन आवेदनं कर्तुं शक्नुवन्ति—पञ्जीकरणस्य जालपुटम्: rojgaarsangam.up.gov.in
अधिकसूचनायै सहायता-सङ्ख्या: १५५३३०
सम्पर्कसूत्रम्: linktr.ee/sewayojan
अतः गोरखपुरस्य समीपवर्तिनः क्षेत्राणां च सर्वे रोजगाराकाङ्क्षिणः युवजनाः अस्य सुवर्णावसरस्य लाभं स्वीकृत्य स्वजीवनस्य उज्ज्वलभविष्यस्य दिशि नवीनाम् आरम्भं कुर्वन्तु इति आयोजकैः आह्वानं कृतम्।

महायोगीगोरखनाथविश्वविद्यालये बी. ए. एम. ए. एस. नवप्रवेशिनां स्वागतार्थम् आयुर्प्रवेशिकायाः भव्यः शुभारम्भः १८ नवम्बर दिनाङ्के



हिमसंस्कृतवार्ताः- वृजेशकुमारपाण्डेयः, गोरखपुरम्। महायोगीगोरखनाथविश्वविद्यालयस्य गुरुगोरक्षनाथ- चिकित्साविज्ञानसंस्थाने (आयुर्वेदसङ्काये) नवप्रविष्टानां बी.ए.एम.ए.एस. (शार्ङ्गधर) सत्रस्य २०२६-२७ तमस्य वर्षस्य छात्राणां स्वागतार्थं, तेषां चिकित्साशिक्षाजीवनस्य शुभारम्भावसरे २०२६ तमस्य वर्षस्य नवम्बरमासस्य १८ दिनाङ्के भव्यस्य उद्घाटनसमारोहस्य आयुर्प्रवेशिकायाश्च आयोजनं भविष्यति। विश्वविद्यालयस्य एम.जी.यू.जी. सभागारे प्रातःकाले आयोज्यमाने अस्मिन् समारोहकार्यक्रमे सर्वेषां नवप्रविष्टानां छात्राणां साभिनन्दनं स्वागतं करिष्यते। उल्लेखनीयं यत् अस्मिन् वर्षेऽपि संस्थाने बी.ए.एम.ए.एस. पाठ्यक्रमस्य सर्वेषु निर्धारितेषु आसनेषु प्रवेशप्रक्रिया पूर्णतया सम्पन्ना जाता अस्ति। एतत् आयुर्वेदशिक्षायाः प्रति छात्राणाम् अभिवर्धमानम् आकर्षणं संस्थाने च तेषां वर्धमानं विश्वासं च प्रदर्शयति। अस्य समारोहस्य अध्यक्षतां विश्वविद्यालयस्य माननीयः कुलपतिः लेफ्टिनेन्ट जनरल डॉ. भूपेशकुमारगोयलः करिष्यति। मुख्यातिथिरूपेण महायोगी- गुरुगोरखनाथ-आयुषविश्वविद्यालयस्य, उत्तरप्रदेशस्य माननीयः कुलपतिः प्रो. के. रामचन्द्र रेड्डी महोदयः समुपस्थास्यति। विशिष्टातिथिरूपेण गोरखपुरजनपदस्य आयुर्वेदाधिकारी डॉ. धर्मेन्द्रसिंहः, मऊजनपदस्य कोपागञ्जस्थितस्य बापू- आयुर्वेदिक- चिकित्सामहाविद्यालयस्य प्राध्यापकः विभागाध्यक्षश्च डॉ. एच. सी. सिंह कुशवाहा महोदयः उपस्थितौ भविष्यतः। संस्थानस्य प्राचार्यः डॉ. गिरिधर वेदान्तम् अपि समारोहस्य शोभां वर्धयिष्यति।आयुर्प्रवेशिका-पाठ्यक्रमस्य माध्यमेन छात्राः आयुर्वेदस्य गौरवशालिनीं परम्परां, मौलिकसिद्धान्तान्, भारतीयज्ञानपरम्परां, चिकित्साशिक्षायाः अनुशासनं चिकित्सकीय- दायित्वानि च ज्ञास्यन्ति। अस्य पाठ्यक्रमस्य प्रमुखम् उद्देश्यम् विद्यालयीयशिक्षातः व्यावसायिक- चिकित्साशिक्षां प्रति छात्राणां सहजसंक्रमणं सुनिश्चित्य तेषु सेवाभावनायाः, संवेदनशीलतायाः, नैतिकतायाः, चिकित्साक्षेत्रे उत्तरदायित्वस्य च भावनां विकसितुं वर्तते।

अयं समारोहः नवप्रविष्टानां छात्राणां कृते केवलं शैक्षणिकजीवनस्य प्रारम्भमात्रं न भविष्यति, अपि तु आयुर्वेदस्य समृद्धपरम्परया सह सम्बद्ध्य दक्षानां, संवेदनशीलानां सेवाभावयुक्तानां च चिकित्सकानां निर्माणदिशि तेषां नूतनसङ्कल्पस्य शुभारम्भः अपि भविष्यति।

शासनात् धनराशेः प्राप्तेः अनन्तरमेव परस्मिन् दिने अर्थात् नवम्बरमासस्य सप्तदशे दिनाङ्के पञ्चसप्तति सहस्रचतुःशतषडशीतिः कृषकेभ्यः चतुस्त्रिंशत्

कोट्यधिकषट्चत्वारिंशलक्षरूप्यकाणाम् अतिरिक्तसहायता प्रदत्ता।

हिमसंस्कृतवार्ताःवृजेश कुमार पाण्डेय

ललितपुरम्। जनपदे अतिवृष्ट्या प्रभावितेभ्यः कृषकेभ्यः आर्थिकसहायतां प्रदातुं जनपदप्रशासनस्य पक्षतः तीव्रगत्या कार्यवाही क्रियमाणा अस्ति। जनपदप्रशासनस्य तत्परतायाः, कृषकहितेषु संवेदनशीलतायाः तथा प्रभाविणः निरीक्षणस्य परिणामस्वरूपं शासनात् षट्त्रिंशत् कोटिरूप्यकाणां धनराशेः प्राप्तेः अनन्तरमेव परस्मिन् दिने, अद्य नवम्बरमासस्य सप्तदशे दिनाङ्के, पञ्चसप्ततिसहस्रचतुःशतषडशीतिः कृषकाणां बैंकखातेषु चतुस्त्रिंशत् कोटि चतुःषष्टिलक्ष पञ्चसप्ततिसहस्र सप्तचत्वारिंशत् रूप्यकाणि आर्थिकसहायतारूपेण हस्तान्तरितानि।अस्याः घटनायाः पूर्वं जनपदे एकलक्षनवत्रिंशत्सहस्रसप्तशतानि एकोनचत्वारिंशत् कृषकेभ्यः षट्षष्टिः कोटि एकोनसप्ततिलक्ष सप्तनवतिसहस्र अष्टशतानि त्रिचत्वारिंशत् रूप्यकाणां आर्थिकसहायता वितरिता आसीत्।सम्प्रति शासनात् प्राप्तायाः षट्त्रिंशत् कोटिरूप्यकाणां धनराशेः सापेक्षेण पञ्चसप्ततिसहस्रचतुःशतषडशीतिः कृषकाणां बैंकखातेषु चतुस्त्रिंशत् कोटि चतुःषष्टिलक्ष पञ्चसप्ततिसहस्र सप्तचत्वारिंशत् रूप्यकाणि हस्तान्तरितानि सन्ति।

एवं पूर्वं वितरितया सम्प्रति हस्तान्तरितया च धनराश्या सह अधुना यावत् जनपदस्य कुलं द्विलक्षपञ्चदशसहस्रद्विशतपञ्चविंशतिः कृषकेभ्यः एकशतकोटि चतुस्त्रिंशत् लक्ष द्विसप्ततिसहस्र अष्टशतानि नवतिः रूप्यकाणाम् आर्थिकसहायता प्रदत्ता अस्ति।

अवशिष्टेभ्यः सर्वेभ्यः पात्रकृषकेभ्यः अपि सहायताराशिः शीघ्रं प्रापयितुं सम्बन्धिताधिकारिणः निर्देशिताः सन्ति।जनपदप्रशासनस्य प्राथमिकता अस्ति यत् अतिवृष्ट्या प्रभावितः प्रत्येकः पात्रकृषकः शासनस्य भावनानुसारं निर्धारितसमये पारदर्शितया च आर्थिकसहायतां प्राप्नुयात्। कृषकेभ्यः शीघ्रं राहतां आर्थिकसम्बलञ्च प्रदातुं प्रशासनं पूर्णनिष्ठया संवेदनशीलतया च कार्यं कुर्वदस्ति।अन्नदातृणां हितानि सर्वोच्चप्राथमिकतायां स्थापयित्वा जनपदप्रशासनेन राहतवितरणप्रक्रियायाः गतिः वर्धिता अस्ति, येन अधिकाधिकाः प्रभावितः कृषकाः शीघ्रमेव आर्थिकसहायतायाः लाभं प्राप्तुं शक्नुयुः।

महोबाजनपदे आरक्षी-अधीक्षकस्य अध्यक्षतायां दूरदृश्य-माध्यमेन जनश्रवणकार्यक्रमः सम्पन्नः



हिमसंस्कृतवार्ताः- वृजेश कुमार पाण्डेयः, महोबा, नवम्बरमासः। महोबाजनपदस्य आरक्षी-अधीक्षकः शशाङ्कसिंहः आरक्षीकार्यालये अन्तर्जालमाध्यमेन दूरदृश्य-सम्भाषणप्रणाल्या जनश्रवणकार्यक्रमम् आयोजितवान्। अस्मिन् कार्यक्रमे जनपदस्य समस्ताः क्षेत्राधिकारिणः, थानाप्रमुखाः तथा अन्ये सम्बन्धिताः आरक्षी-अधिकारिणः सहभागिताम् अकुर्वन्। जनश्रवणकार्यक्रमस्य समये प्राप्तानां जनशिकायतानां प्रार्थनापत्राणां च गम्भीरतया परीक्षणं कृत्वा शिकायतकर्तृणां समस्याः संवेदनशीलतया प्राथमिकतया च श्रुताः।प्रत्येकं प्रकरणस्य प्रगतेः समीक्षां कुर्वन् आरक्षी-अधीक्षकः सम्बन्धितैः थानाप्रमुखैः सह प्रत्यक्षं संवादं स्थापितवान्। जनशिकायतानां पारदर्शितया, गुणवत्तापूर्णतया, निष्पक्षतया तथा निर्धारितसमयसीमायां निस्तारणं सुनिश्चितं कर्तुं सम्बन्धितेभ्यः आरक्षी-अधिकारिभ्यः आवश्यकाः निर्देशाः प्रदत्ताः। अनेन जनश्रवणकार्यक्रमेण जनसामान्यस्य समस्याः शीघ्रं न्यायोचितरीत्या च समाधातुं आरक्षीप्रशासनस्य प्रतिबद्धता पुनः प्रतिपादिता।

अखिलभारतीयेन्द्रविद्यावाचस्पति-सद्योवाक्स्पर्धायाः

संस्कृतकविसमवायस्य च आयोजनम्

नवदेहली, बुधवारः, १८ नवम्बर २०२६। दिल्ली-संस्कृत-अकादम्याः, दिल्ली-सर्वकारस्य च तथा दिल्ली-विश्वविद्यालयस्य संस्कृत-विभागस्य संयुक्तत्त्वावधाने २०२६ तमस्य वर्षस्य नवम्बरमासस्य १८ तमे दिनाङ्के प्रातः १० वादने 'अखिलभारतीय-इन्द्रविद्यावाचस्पति-सद्योवाक्स्पर्धायाः' तथा 'संस्कृत-कवि-समवायस्य' आयोजनं भविष्यति।अस्मिन् कार्यक्रमे देशस्य विभिन्नेभ्यः प्रदेशेभ्यः समागच्छन्तः संस्कृतविद्वांसः, कवयः, अध्यापकाः, छात्राश्च भागं ग्रहीष्यन्ति। सद्योवाक्स्पर्धायां प्रतिभागिनः प्रदत्तविषयेषु तत्क्षणमेव संस्कृतभाषया स्वकीयविचारान् प्रभावपूर्णरीत्या अभिव्यक्तं करिष्यन्ति। संस्कृत-कवि-समवाये च कवयः स्वविरचितानां संस्कृतकाव्यानां सस्वरं काव्यपाठं कृत्वा श्रोतॄन् आनन्दयिष्यन्ति। अस्य आयोजनस्य प्रमुखम् उद्देश्यं संस्कृतभाषायाः प्रचारप्रसारः, संवर्धनं चास्ति



'मातृभाषा'

[अकबर बीरबल कथा]

कश्चित् बहुभाषाकोविद अकबरनृपस्य राजसभायां आगतवान्, अवदत् च अहं शृण्वन् यद्- भवतः राजसभायां अतीव बुद्धिमन्तः जनाः सन्ति। तर्हि मम मातृभाषा का अस्ति इति ज्ञात्वा दर्शयतु। राजसभायाः जनाः बह्व्यः प्रयतन्ते परन्तु सः सर्वाभाषाः प्रवीणतयाः अवदत्। बीरबलः तम् एकदिनं प्रतीक्षितुं अवदत्। यदा सः सुप्तवान् तदा गभीरा निद्रायां बीरबलः तस्योपरि शीतजलम् अक्षिपत्। कम्पमान सः 'सू छे' वदित्वा उत्थित्। अपरदिने राजसभायां बीरबलः अवदत् यत् अस्य मनुष्यस्य मातृभाषा गुजराती इति। मनुष्यः तत् स्वीकुर्वति। अकबरस्य राजसभायां तेजस्वी रत्नानि सन्ति इति कथयन सः अगच्छत् सभायां जनाः पृष्टवन्तः कथं त्वां तं परिचितम्? तदा बीरबलः अवदत्- '' अदक्षः क्षणे तथा च आपदि मनुष्यः सदैव मातृभाषायाम् एव वदति।सत्यं खलु?

रविः खरिडेहालः – बेङ्गलूरु

"क्रीडाक्रियाकलापानाम् समर्थनार्थं केपीएमजी प्रौद्योगिकीसंस्था



"भारतस्य क्रीडा-उद्योगः महत्त्वपूर्णव्यापार-अवसररूपेण उद्भवति । २०३०-३१ यावत् क्रीडाविपण्यं ४२ बिलियन् डॉलरं यावत् भविष्यति इति अनुमानितम् अस्ति । व्यावसायिक-क्रीडा-सङ्घेषु, क्रीडासंरचनासु, क्रीडकविकासेषु, क्रीडायाः अङ्कीयमञ्चेषु वर्धमाननिवेशः क्रिकेट्-क्रीडायाः परं अवसरान् उद्घाटयति | २०३० राष्ट्रमण्डलक्रीडाः, २०३६ ओलम्पिकक्रीडायाः आतिथ्यं कर्तुं भारतस्य महत्त्वाकांक्षा च अस्मिन् क्षेत्रे व्ययस्य त्वरिततां कर्तुं शक्नोति । अद्यैव केपीएमजी-संस्थायाः बेङ्गलूरुनगरे स्वस्य क्रीडाप्रौद्योगिकीकेन्द्रस्य अनावरणं कृतम् अस्ति । एतत् एआइ, उन्नतविश्लेषणं, सङ्गणकीकृतक्रीडकानां प्रशिक्षणं, क्रीडा-अन्तर्दृष्टिः, अङ्कीय-मञ्चाः, बृहत्-परिमाणस्य आयोजनानां योजनां प्रबन्धनं च एकत्र आनयति । २०२५ तमे वर्षे क्रीडा-उद्योगः १९ बिलियन्-डॉलर् आसीत्, अस्मिन् वर्षे च प्रायः २१ बिलियन्-डॉलर् आसीत्, १२% तः १४% पर्यन्तं वर्धमानः च । बेङ्गलुरु नगरेकेपीएमजी केन्द्रम् समाधानं विकसितुं यत् क्रीडक-प्रदर्शनम् आधुनिक-प्रौद्योगिकी-युक्त-क्रीडाङ्गणानि यावत् व्याप्नोति।

व्याकरणचिन्तनम्- १२

विनि / इनि - प्रत्ययौ - तद्धितान्तौ।
सूत्रम्-मतुप्- अर्थे विनि / इनि च भवतः।
अर्थः- "युक्तः / अस्य अस्ति" इति।
यथा- धनम् अस्य अस्ति = धनी ।

१. इनि-प्रत्ययः-

सूत्रम् - "अत इनिठनौ" इति ।
अकारान्त-शब्दे + इनि भवति।
शब्दसिद्धिः- धन + इनि = धनी (धनिकः)
गुण + इनि = गुणी (गुणवान्)
धर्म + इनि = धर्मी (धार्मिकः)
ज्ञान + इनि = ज्ञानी (ज्ञानवान्)
मान + इनि = मानी ।सिद्धिः-धन + इनि = धनिन् - धनिन् + सु (पुं) = धनी ।

२. विनि-प्रत्ययः-

सूत्रम् - "अस्मायामेधास्रजो विनिः" इति । अर्थात् मेधा, माया, अस् इत्यादिशब्देषु विनि भवति।
सिद्धिः- मेधा + विनि = मेधावी (बुद्धिमान्)
माया + विनि = मायावी (मायिकः)
तेजस् + विनि = तेजस्वी (तेजोवान्)
यशस् + विनि = यशस्वी (यशोवान्)
पयस् + विनि = पयस्वी (पयोवान्)
सिद्धिः-मेधा + विनि = मेधाविन्- मेधाविन् + सु = मेधावी।

अभ्यासाय वाक्योदाहरणानि-इनि-प्रत्ययात्, दशवाक्यानि दीयन्ते । यथा -

१. माधवः धनी पुरुषः अस्ति।
२. रामः गुणी राजा आसीत्।
३. युधिष्ठिरः धर्मी आसीत्।
४. हनुमान् ज्ञानी भक्तः अस्ति।
५. विद्वान् मानी भवति।
६. सः आचरणेन विनयी अस्ति।
७. ज्ञानिनः वचनं सर्वे शृण्वन्ति।
८. गुणिनः जनाः सर्वत्र पूज्यन्ते।
९. धर्मिणः पुरुषस्य जयः भवति।
१०. सः मानी अस्ति, जनसेवां करोति।



असमप्रदेशीयः विज्ञानशिक्षकः, नारदोपाध्यायः

एवं विनि-प्रत्ययात् दशवाक्यानि च-

११. शङ्कराचार्यः मेधावी आसीत्।
१२. रावणः मायावी राक्षसः आसीत्।
१३. सूर्यः तेजस्वी अस्ति।
१४. रामः यशस्वी राजा आसीत्।
१५. एषा गौः पयस्विनी अस्ति।
१६. मेधाविनः छात्राः परीक्षायां उत्तीर्णाः भवन्ति।
१७. तेजस्विनः पुरुषस्य मुखं दीप्यते।
१८. यशस्विनः कवेः कीर्तिः सर्वत्र प्रसरति।
१९. कृष्णः मायाविनं कंसं हतवान्।
२०. पयस्विनीनां गवां दुग्धं मधुरं भवति।

ईदृशाः तद्धितान्तशब्दाः त्रिषु लिङ्गेषु सम्भवन्ति।
यथा- गुणी/गुणिनी/गुणि।
तेजस्वी/तेजस्विनी/तेजस्वि इति।



हिमसंस्कृतवार्ताः, ईदरधीरजः

वार्ता-संवादः

नन्दिनी- नमो वः। अद्यतने वार्ता-कार्यक्रमे स्वागतं व्याहरामि। नमस्ते काव्ये। अद्य अस्माकं पार्श्वे चतस्रः विचित्राः वार्ताः सन्ति। प्रथमा वार्ता मध्यप्रदेशतः अस्ति। तत्र एकस्याः जनवसतेः समीपे एकः मकरः आगतः। वनविभागस्य रक्षकाः शीघ्रं न आगताः। प्रतीक्षया श्रान्तया एकया महिलया स्वयमेव सः मकरः गृहीतः। रक्षकाणाम् आगमनपर्यन्तं तया सः सुरक्षिततया धृतः।

काव्या- नमस्ते नन्दिनि! अस्मिन् कार्यक्रमे निमन्त्रणाय कृतज्ञताम् अर्पयामि तुभ्यम्। अहो, तस्याः महिलायाः साहसं तु अद्भुतम् एव! अधुना द्वितीयां विचित्रां वार्तां शृणु। एकस्याः कुल्यायाः जलम् अस्थायिरूपेण निष्कासितम्। तत्र पङ्के एकेन पितामहेन एका प्राचीना अखण्डिता 'कोका- कोला' काचकूपी लब्धा। किन्तु अर्धहोरायाः अनन्तरं तेन ज्ञातं यत् तस्य पौत्रेण सा बहुमूल्या कूपी पुनः पङ्के क्षिप्ता! तेन पौत्रेण केवलं मत्स्यग्रहण-साधनानि इच्छता सा कूपी व्यर्था मता, पुनः कुल्यायां च क्षिप्ता।

नन्दिनी- हह! पितामहस्य भाग्यं व्यर्थं जातम्! बालकस्य तु स्वक्रीडावस्तु एव प्रियम्। इदानीं तृतीयां वार्तां शृणु। एकया युवत्या स्वप्रेमिणे 'जी-टी-ए षष्ठम्' (GTA 6) इति प्रसिद्धा सङ्गणक-क्रीडा उपहाररूपेण दत्ता। परन्तु उपहारात् पूर्वं तया तस्मै एकं कठोरम् अनुबन्धपत्रं दत्तम्, तेन च तस्मिन् हस्ताक्षरं कृतम्। तस्मिन् पत्रे लिखितं यत् सः प्रतिदिनं तया सह वार्तालापं करिष्यति, गृहकार्याणि च करिष्यति। क्रीडायै अपि सीमितः समयः एव निश्चितः, येन सः वास्तविकं संसारं न विस्मरेत्।

काव्या- सत्यम्, अतिबुद्धिमती खलु सा युवती! क्रीडायाः कारणात् प्रेम्णि विघ्नः न भवेत् इति तया उत्तमः उपायः कृतः। अधुना चतुर्थीम् अन्तिमां च वार्तां वदामि। उत्तरप्रदेशे एकेन अशीतिवर्षीयेण वृद्धेन एकं विलक्षणं कार्यं कृतम्। मृत्योः अनन्तरं क्रियमाणस्य मृत्युभोजस्य प्रतीक्षाम् अकृत्वा, तेन जीवता एव नवशताय ग्रामीणेभ्यः एकः महान् भोजः आयोजितः। सर्वैः ग्रामीणैः तत्र आगतैः आनन्देन भोजनं खादितम्। तेन वृद्धेन अपि स्वयम् उत्सवे उपस्थितेन स्वपुत्राय पारिवारिकः उष्णीषः (पगडी) समर्पितः। एवं सः जीवन्नेव स्वस्य उत्सवस्य साक्षी जातः!

नन्दिनी- अहो! सः वृद्धः तु अतीव चतुरः! स्वजीवने एव तेन स्वकीयोत्सवस्य आनन्दः प्राप्तः! काव्ये, एतासां विचित्र-वार्तानां कथनस्य कृते कृतज्ञताम् अर्पयामि तुभ्यम्। सर्वेभ्यः श्रोतृभ्यः अपि धन्यवादः। पुनर्मेलिष्यामः!